शोकाभावदायके कदम्बवृक्षे शब्दच० कदम्बशब्दे विवृतिः ।

**अशोकाष्टमी** स्त्री नास्ति शोकोयस्याः कर्म्म० । चैत्रशुक्लाष्टम्यां,सा हि अशोककलिकापानादशोकदायिका । यथोक्तं हेमा०व्र०ख० लिङ्गपुरा० । "अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ । चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः ।" कूर्म्म पुरा० । चैत्रे मासि सिताष्टम्यां बुधवारे पुनर्वसौ । अशोककुसुमैरुद्रमर्चयित्वा विधानतः । अशोकस्याष्ट कलिका मन्त्रेणोक्तेन भक्षयेत् ।" शोकं नैवाप्नुयान्मर्त्यः" अत्र बुधपुनर्वसुयोगः प्राशस्त्यार्थः हेमा० । "अशोककलिकापानमशोकतरुपूजनम्" शुक्लाष्टम्यां तु चैत्रस्य कृत्वा प्राप्नोति निर्वृतिमिति" लैङ्गे चैत्रशुक्लाष्टमीमात्रस्य निमित्ततोक्तेः । मन्त्रस्तु तत्रैव दृश्यः ।

**अशोच्य** त्रि० शुच–कर्म्मणि ण्यत् न०त० । शोचनानर्हे यमुद्दिश्य शुच्यते तद्भिन्ने । "अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे" गीता ।

**अशोधन** न० अभावे न०त० । १शोधनाभावे । न०ब० । २शोधनशून्ये त्रि० । शोधनञ्चाशुचेर्जलादिना मलाद्यपनयनम् ऋणादेः प्रतिदानञ्च तदभावोऽशोधनम् ।

**अशोधित** त्रि० न०त० । १अप्रक्षालिते जलादिनाऽकृत मलाद्यपनयने २अकृतर्णादिप्रतिदाने च ।

**अशोभन** त्रि० शुभ–कर्त्तरि ल्यु न०त० । १शोभनभिन्ने कुत्सिते । भावे ल्युट् अभावे न०त० । २मण्डनाभावे ।

**अशोष्य** त्रि० शुष–णिच्–ण्यत् न०त० । शोषयितुमशक्ये । "अच्छेद्योयमदाह्योऽयमक्लेद्योऽशोष्य एव च" गीता ।

**अशौच** न० शुचेर्भावः शौचं न०त० । १शुचित्वाभावे स्मृतिप्रसिद्धे, विहित-तकर्म्मानधिकारित्वसम्पादके २अधर्म्मविशेषे च । "जनने मरणे चैव त्र्यहाशौचस्य भागिनः" स्मृतिः । "समानं लघु चाशौचं पूर्व्वेणैव विशुध्यति । असमानं द्वितीयेनेति" यमः । स्वार्थे ष्यञ् आशौच्यमप्यत्र "आशौच्याद्विप्रमुच्येत" स्मृतिः । "अशौचं द्विविधं कालकृतं वस्तुस्वभावकृतञ्च तत्र कालकृतं "सव्रणः स्मृतकीत्यादिना" अशुद्धिशब्दे ४८० पृष्ठे दर्शितम् तथाच । सपिण्डमरणजननादिकृतं कालविशेषेऽशौचम् कालापगमे च तन्नाशः । तच्च चेतननिष्ठम् । बहुधा चास्य शुद्धितत्त्वादौ प्रपञ्चः । वस्तूनामशौचं स्वभावात् यथा मलमूत्रादेः, यत्संसर्गादितरवस्तूनामप्यशौचं शुद्ध्यभावः एवं तेषां संसर्गादिकृतं चेतनादेरशौचं यथा उच्छिष्टचण्डालादिस्पर्शे एवमशौचिस्पर्शिकद्रव्यविशेषाणामाप्यशौचम् शुद्ध्यभावः । अथ सपिण्डासपिण्डादिभेदेनाशौचकालविशेषो यथा "जनने मरणे च सप्तमपुरुषपर्य्यन्तं विप्रस्य दशाहः, क्षत्रियस्य द्वादशाहः, वैश्यस्य पञ्चदशाहः, शूद्रस्य मासः । दशमपुरुषपर्य्यन्तं सर्व्ववर्णेषु त्र्यहः चतुर्दशपुरुषपर्य्यन्तं पक्षिणी जन्मनामस्मृतिपर्य्यन्तमेकाहः ततः स्नानमात्रम् । कन्यायाः सापिण्ड्यं त्रिपौरुषम् । अथ विदेशस्थाशौचम् । अशौचकालाभ्यन्तरे विदेशस्थस्याशौचश्रवणे शेषाहैः शुद्धिः । अशौचकालोत्तरश्रवणे तु ज्ञातिजननाशौचं नास्त्येव । पुत्रजनने तु सचेलस्नानात् शुद्धिः । मरणाशौचे तु वर्षाभ्यन्तरश्रवणे त्र्यहात् शुद्धिः । सचेलस्नानादङ्गास्पृश्यत्वनिवृत्तिः । वर्षोत्तरश्रवणे स्नानेन शुद्धिः सपिण्डानाम् । पुत्रादीनान्तु मातृपितृभर्तृमरणे वर्षोत्तरमेकाहेन शुद्धिः, द्वितीयवर्षे श्रवणे सद्यः । संपूर्णाशौचातिक्रमे त्र्यहाशौचं न बालाद्यशौचातिक्रमे खण्डाशौचातिक्रमे वा । अथ गर्भस्रावाशौचम् । गर्भस्रावे तु स्त्रीणामेव षण्मासाभ्यन्तरेऽशौचं तच्च लौकिके कर्म्मणि माससमसंख्यदिनव्यापकं द्वितीयमासावधिमाससमसंख्यदिनाधिकैकदिनात् परं ब्राह्मण्या वैदिककर्म्माधिकारः क्षत्रियाया दिनद्वयात् वैश्यायादिनत्रयात् शूद्रायास्तु दिनषट्कादिति हारलताप्रभृतयः । सप्तमाष्टममासीयगर्भपतने स्त्रीणां संपूर्णाशौचम् निर्गुणसपिण्डानामहोरात्रं यथेष्टाचरणपपिण्डानां त्रिरात्रम् तच्च जातस्य तद्दिनएव मरणे ज्ञेयं द्वितीयदिनादौ तु मरणे नवमादिमासजातबालकवत् । अथ स्त्र्यशौचम् । कन्यायाः जन्मप्रभृतिद्विवर्षाभ्यन्तरमरणे सद्यः शौचं तदुपरि वाग्दानपर्य्यन्तमेकाहः । वाग्दानोत्तरविवाहपर्य्यन्तं भर्त्तृकुले पितृकुले च कन्याया आदन्तजन्ममरणे सद्यः शौचम्, आ चूडादेकराहकम्, आ प्रदानात्त्रिरात्रं, स्यादिति विशेषः । दत्तकन्यायाः पितृगृहे प्रसवमरणयोः पित्रोः शयनादिसंसर्गम्भून्ययोरपि त्रिरात्रं तथाविधबन्धुवर्गाणामेकरात्रम् सम्पर्के दशरात्रम् । अथ बालाद्यशौचम् । नवमादिमासजातबालकस्याशौचकालाभ्यन्तरमरणे मातापित्रोरस्पृश्यत्वयुक्तं तदेव जननाशौचं ज्ञातीनान्त्वशौचं नास्ति नवमादिमासमृतजातयोस्तु कन्यापुत्रयोः पित्रादिसपिण्डानां जननाशौचं संपूर्णम् । पुत्त्रजन्मनि मुखदर्शनात् पूर्व्वं सचेलस्नानं कृत्वा ब्राह्मणेभ्यश्च यथाशक्ति दत्त्वा बालकाय काञ्चनं दत्त्वा मुखं पश्येत् । ततः पुनः सचेलस्नानम् ।